+श्रु+असुन् ।) इन्द्रघोटकः । इत्यमरः ॥ स तु श्वेतवर्णः समुद्रमन्थनोत्थितः । इति श्रीभागवतम् ॥ ("उच्चैःश्रवास्तेन हयरत्नमहारि च" ॥ इति कुमारे । २ । ४७ ॥)

उच्चैर्घुष्टं, क्ली, (उच्चैर्घुष्यते स्म । घुष + क्त ।) घोषणा । इत्यमरः ॥

उच्छ, इ श उञ्छे । इति कविकल्पद्रुमः ॥ (तुदां-इदित्-परं-सकं-सेट् ।) ऋछादिः । इ उच्छति । श उच्छती उच्छन्ती । उञ्छ उद्धृतशस्यस्य शेषाप-हरणम् । (यथा, हलायुधः ।

"सुलभं शस्यमुञ्छन्ति यद्देशे व्रतिनो द्विजाः" । उञ्छः स्फोटनमित्येके । इति दुर्गादासः ॥

उच्छ, ई श बन्धे । समापने अतिक्रमे । वर्जने । इति कविकल्पद्रुमः । (तुदां-परं-सकं-सेट् ।) ई उष्टः । श उच्छती उच्छन्ती । चत्वारोऽर्थाः । समापने । (अक०) उच्छति रात्रिः । "भरण्यां व्युष्टायामुषसि जनयासास तनयम्" । व्युष्टायां समाप्तायामित्यर्थः । इति दुर्गादासः ॥

उच्छन्नं, त्रि, (उत् + छद + क्त ।) नष्टम् । इति श्रीभगवद्गीता ॥

उच्छादनं, क्ली, (उत् + छद + णिच् + ल्युट् ।) उत्-सादनम् । उद्वर्त्तनम् । गन्धद्रव्यद्वारा शरीरनिर्म-लीकरणम् ॥ इत्यमरटीका ॥

("यथाशक्तिप्रदानेन स्नापनोच्छादनेन च" । इति रामायणे । २ । १११ । १० ॥)

उच्छिलीन्ध्र, क्ली, (उत्थितं शिलीन्ध्रम् ।) छत्रिका । इति श्रीभागवतम् ॥ कोड़क छाता इति भाषा) ("उद्गतशिलीन्ध्रे, त्रि, "कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्" ॥ इति मेघदूते । पूर्व्वमेघे । १८ ॥)

उच्छिष्टं, त्रि, (उत् शिष्यते यत् । उत् + शिष + क्त ॥) भुक्तावशिष्टम् । इति पुराणम् ॥ एंटो इति भाषा । तद्भोजनप्रायश्चित्तं यथा (प्रायश्चित्ततत्त्वे चाण्डालाद्यन्नभक्षणप्रायश्चित्तप्रकरणे ।) विष्णुः । "आमश्राद्धाशने त्रिरात्रं पयसा वर्त्तेत ब्राह्मणः शूद्रोच्छिष्टाशने च वमनं कृत्वा सप्तरात्रमुपवसेत्" । इति । एवं उच्छिष्टे यः पराक उक्तोऽङ्गिरसा सोऽपि प्रागुक्तसङ्कटापदादिविषये बोध्यः । विष्णु नापि अनुच्छिष्टे पराकोक्तेः । तथाचाङ्गिराः ।

"चाण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे ।

द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुध्यति" ॥

यत्तु मिताक्षरायामापस्तम्बः ।

"अन्त्यानां भुक्तशेषन्तु भक्षयित्वा द्विजातयः ।

चान्द्रं कृच्छ्रं तदर्द्धन्तु ब्रह्मक्षत्रविशां विधिः" ॥

चान्द्रं चान्द्रायणम् । कृच्छ्रं तप्तकृच्छ्रम् । एतच्च ब्राह्मणस्य सकृदशानविषयं बलात्कारानुत्तारे-ऽप्यशितरताम्बूलाद्युत्सृष्टपरञ्च । तच्चाशाने आप-स्तम्बेन उच्छिष्टे चान्द्रायणविधानात् । अङ्गिरसा अन्त्यावसायिनामित्यादि प्रागुक्तवचने सामान्यत-स्तप्तकृच्छ्रविधानात् अनुच्छिष्टेऽपि तथात्वादेव सर्व्वत्रानुच्छिष्टादुच्छिष्टे द्वैगुण्यं बोध्यम् । प्राय-श्चित्तविवेके संसर्गप्रकरणेऽप्येवम् । क्षत्रियवि-शोरापदि श्रेयम्" ॥*॥ "सर्व्वत्रोच्छिष्टे तु व्रत-द्वैगुण्यं आपद्यानभुक्तोत्तारिते मासयावकव्रतं तदशक्तौ धेनुद्वयं षट्कार्षापणा वा देयाः । तत्रो-च्छिष्टान्ने पराक इति । अभ्यासभेदे त्वावृत्ति-रूहनीया" । इति प्रायश्चित्ततत्त्वम् ॥ * ॥ अथो-च्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तम् । (तत्रैव उच्छिष्टस्य चाण्डालादिस्पर्शप्रायश्चित्तप्रकरणे द्रष्टव्यम् ।) आपस्तम्बः ।

"भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा ।

प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम् ॥

गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत् ।

त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति ॥

भुक्तोच्छिष्टोऽन्त्यजैः स्पृष्टः प्राजापत्यं समाचरेत् ।

अर्द्धोच्छिष्टे स्मृतः पादः पाद आमाशने तथा" ॥

प्राजापत्यं ज्ञाने अर्द्धोच्छिष्टो येनाद्यग्रास आस्ये निक्षिप्तः न तु निगीर्णः । दक्षः ।

"पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः ।

संस्पर्शं यदि गच्छेत्तु शवोदक्यान्त्यजैः सह ॥

दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयम् ।"

दिनत्रयं मैथुने स्यात् पाने स्याच्च चतुष्टयम् ॥

काश्यपः ।

श्वसूकरान्त्यचाण्डालमद्यभाण्डरजस्वलाः ।

यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सान्तपनं चरेत् ॥

एतद्ज्ञानाभ्यासे सान्तपने धेनुद्वयं ॥ ब्रह्मपुराणे ।

"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः ।

उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा ॥

उच्छिष्टेन तु विप्रेण विप्रः स्पृष्टस्तु तादृशः ।

उभौ स्नानं प्रकुर्व्वतं सद्य एव समाहितौ" ॥

अनुच्छिष्टशूद्रस्पर्शे उच्छिष्टब्राह्मणस्य नक्तमिति प्रायश्चित्तविवेकः ॥ त्यक्तं । इति हेमचन्द्रः ॥ (यथा, शतपथब्राह्मणे २।३१।११ । "ऊतोच्छिष्टमिदम्" । इति । अनाचान्तो भक्षकः । यथा मनुः २ । ५६ ।

"नचैवात्यशनं कुर्य्यात् नचोच्छिष्टः क्वचित् व्रजेत्" ।

उच्छिष्टभोजनः, पुं, (उच्छिष्टं देवनैवेद्यावशिष्टं भो-जनं यस्य ।) देवनैवेद्यबलिभोजनकर्त्ता । इति हेमचन्द्रः ॥

उच्छिष्टमोदनं, क्ली, सिक्थम् । इति राजनिर्घण्टः । मोम इति भाषा ॥

उच्छीर्षकं, क्ली, (उत् ऊर्द्ध्वस्थापितं शीर्षं मस्तकं येन । बहुव्रीह्यर्थे कन् ।) उपधानम् । इति हलायुधः । बालिश इति भाषा ॥

उच्छूनं, त्रि, (उत् + श्वि + क्त । ओदितश्चेति तस्य नः । यजादित्वात् सम्प्रसारणे पूर्व्वरूपे च हल इति दीर्घः ।) स्फीतम् । उन्नतम् । वर्द्धितम् । तथा च प्राचीनाः ।

"कामिन्याः कियदुच्छूनमुरः प्रेयान् समीक्षते ।

नवं शालिमिवोत्पन्नमतिदीनः कृषीबलः" ॥

(खर्गग्रामटिकाविलुण्ठनव्यथोच्छूनैः किमेभिर्भुजैः । इति साहित्यदर्पणे । १ परिच्छेदे ॥)

उच्छृङ्खलं, त्रि, (उद्गतं शृङ्खलं निगड़ं यस्य ।) शृङ्ख-लारहितं । तत्पर्य्यायः । अबाधं २ उद्दाम ३ अनि-यन्त्रितं ४ अनर्गलं ५ निरङ्कुशं ६ । इति हेम-चन्द्रः ॥ (यथा, हितोपदेशः ३ । ९७ ।

("अन्यदुच्छृङ्खलं सत्त्वमन्यत् शास्त्रनियन्त्रितम्" ॥

"सम्मूर्च्छदुच्छृङ्खलशङ्खनिस्वनः" ।

इति माघः । १२ । १३ ॥)

उच्छ्रयः, पुं, (उत् + श्रि + अच् ।) पर्व्वतवृक्षादेरु-च्चता । तत्पर्य्यायः । उच्छ्रायः २ उत्सेधः ३ । इत्य-मरः ॥ ("प्राप्ते यूपोच्छ्रये तस्मिन् षड्वैल्वाः खादिराश्च षट्" । इति रामायणे ॥)

उच्छ्रायः, पुं, (उत् + श्रि + घञ् ।) उच्छ्रयः । उच्चता । इत्यमरः ॥ (यथा, याज्ञवल्क्ये ।

"ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च" ।

"शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं" ॥

इति मेघदूते । ६० ॥)

उच्छ्रितं, त्रि, (उत् + श्रि + क्त ।) संजातं । समुन्नद्धं । उच्चं । प्रवृद्धं । इति मेदिनी ॥ (यथा, महाभा-रते १३ । दानधर्म्मकथने । ८१ । २६ । "सर्व्वे-मयैर्भान्ति शृङ्गैस्तावभिरुच्छ्रितैः" ।) त्यक्तं । इति हेमचन्द्रः ॥

उच्छ्वसितं, त्रि, (उत् + श्वस् + क्त ।) प्रफुल्लं । विका-सितं । इति हेमचन्द्रः ॥ (भावे + क्त । जीवितम् । स्फुरितम् । प्राणनम् । यथा, मेघदूते । १०१ ।

"त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव" ।

"सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्" ।

इति शाकुन्तले ३ अङ्के ॥)

उच्छ्वासः, पुं, (उत् + श्वस् + घञ् ।) अन्तर्मुखश्वासः । ("प्रियामुखोच्छ्वासविकम्पितं मधु" । इति ऋतु-संहारे ग्रीष्मवर्णनायां ३ ।) तत्पर्य्यायः । आहरः २ आनः ३ । इति हेमचन्द्रः ॥ आख्यायिकापरि-च्छेदः । आश्वासः । इति मेदिनी ॥ (यथा, काव्या-दर्शे आख्यायिकालक्षणकथने,—

"वक्त्रं चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम्" ॥)

उज्जयनी, स्त्री, विशालानगरी । इति त्रिकाण्डशेषः ॥ उजैन इति पश्चिमदेशे ख्याता । वङ्गदेशे तु उजनी । इयं मालवदेशस्य नगरी । मोक्षदसप्त-पुर्य्यन्तर्गतपुरी । पुरा विक्रमादित्यराजधानी च अधुना महाराष्ट्रेणाधिकृता ॥ (यथा, मेघदूते पूर्व्वमेघे । २९ ॥

"सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः" ।)

उज्जयन्तः, पुं, रैवतपर्व्वतः । इति हेमचन्द्रः ॥

उज्जयिनी, स्त्री, उज्जयनीनगरी । तत्पर्य्यायः । विशाला २ अवन्ती ३ पुष्पकरण्डिनी ४ । इति हेमचन्द्रः ॥

उज्जासनं, क्ली, (उत्, जसु हिंसायाम् । णिच् भावे ल्युट् ।) मारणम् । बधः । इत्यमरः ॥

उज्जृम्भं, त्रि, (उत् + जृम्भि + घञ् ।) प्रफुल्लम् । प्रस्फुटितम् । इति हेमचन्द्रः ॥

("उज्जृम्भवदनाम्भोजा भिनत्त्यङ्गानि साङ्गना" । इति साहित्यदर्पणे । ३ परिच्छेदे ॥)

उज्जृम्भितं, त्रि, (उत् + जृम्भि + क्त ॥) प्रफुल्लम् । चेष्टायां, क्ली । इति मेदिनी ॥

उज्ज्वलं, त्रि, (उच्चैर्ज्वलति प्रकाशते इति । उत् + ज्वल् + अच् ।) दीप्तम् । विशदम् । विकाशितम् ।